[RV S 1-89 & *SYVM 25-14 ; SYVK27-18* (Kāñchī Pāṭhaḥa)]

ॐ आ नो॑ भ॒द्राः क्रत॑वो यन्तु वि॒श्वतोऽद॑ब्धासो॒ , अप॑रीतास , उ॒द्भिद॑ः ।
दे॒वा नो॒ यथा॒ सद॒मिद्वृ॒धे , अस॒न्नप्रा॑युवो रक्षि॒तारो॑ दि॒वेदि॑वे ॥ १ ॥
ॐ ā nō॒ bhad’rā[hk]’ krata-vō yan’tu viśh’vatō
(a)dab’dhāsō , apa-rītāsa , ud’bhida-ḥa ।
dēvā nō yathā sadamid’vṛdhē ,
asan’nap’rāāyuvō rak’ṣhitārō॒ divēdi-vē ॥ 1 ॥

दे॒वानां॑ भ॒द्रा सु॑म॒तिर्ऋ॑जूय॒तां दे॒वानां॑ रा॒तिर॒भि नो॒ नि व॑र्तताम् ।
दे॒वानां॑ सख्यमु॒प सेदिमा व॒यं दे॒वा न॒ , आयुः प्र ति॑रन्तु जी॒वसे॑ ॥ २ ॥
dēvānāām’ bhad’rā su-matir’ṛ-jūyatān’
dēvānāṁ’ rātirabhi nō ni var’tatām ।
dēvānāṁ’ sakh’yamupa- sēdimā vayan’ dēvā na ,
āyu[fp]’ pra ti-ran’tu jīvasēē ॥ 2 ॥

तान्पू॒र्वया॒ नि॒विदा॑ हूमहे व॒यं भगं॑ मि॒त्रमदि॑तिं दक्ष॒मस्रि॑धम् ।
अ॒र्य॒मणं॑ वरु॒णं सोम॒मश्वि॑ना॒ सर॑स्वती नः सु॒भगा॒ मय॑स्करत् ॥ ३ ॥
tān’pūr’va-yā nividāā hūmahē vayam’ bhagam’m’
mit’ramadi-tin’ dak’ṣha-mas’ridham’m ।
ar’yamaṇaṁ’ varu-ṇaṁ’ sōma-maśh’vinā saras’vatī
nas’ subhagā mayas’karate ॥ 3 ॥

www.sanveda.net

तन्नो॒ वातो॑ मयो॒भु वा॑तु भेष॒जं तन्मा॒ता पृ॑थि॒वी तत्पि॒ता द्यौः ।
तद्ग्रावा॑णः सोम॒सुतो॑ मयो॒भुव॒स्तद॑श्विना शृणुतं धिष्ण्या युवम् ॥ ४॥

tan’nō vātōō mayōbhu vāātu bhēṣhajan’
tan’mātā pṛ-thivī tat’pitād’ dyau-ḥu ।
tad’grāvāāṇas’ sōmasutōō mayōbhuvas’tadaśh’vinā
śhṛṇutan’ dhiṣh’ṇyā yuvam ॥ 4 ॥

तमीशा॑नं॒ जग॑तस्त॒स्थुष॒स्पतिं॑ धियंजि॒न्वमव॑से हूमहे व॒यम् ।
पूषा नो॒ यथा॒ वेद॑सामस॒द्वृधे॑ र॑क्षिता पा॒युर॑द॒ब्धः स्व॒स्तये॑ ॥ ५॥

tamīśhāāñ’ jaga-tas’tas’thuṣhas’patin’n’
dhiyañ’jin’vamava-sē hūmahē vayam ।
pūṣhā nō yathā vēda-sāmasad’vṛdhē rak’ṣhitā
pāyuradab’dhas’ svas’tayēē ॥ 5 ॥

स्व॒स्ति न॒ , इन्द्रो॑ वृ॒द्धश्र॑वाः स्व॒स्ति न॑ः पू॒षा वि॒श्ववे॑दाः ।
स्व॒स्ति न॒स्तार्क्ष्यो॑ , अरि॑ष्टनेमिः स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥ ६॥

svas’ti na , in’drōō vṛd’dhaśh’ravās’
svas’ti na[fp]’ pūṣhā viśh’vavēēdā-ḥa ।
svas’ti nas’tārk’ṣhyō , ariṣh’ṭanēmis’
svas’ti nō bṛhas’patir’dadhātu ॥ 6 ॥

पृष॑दश्वा म॒रुत॑ः पृश्नि॒मातरः॑ शुभं॒यावा॑नो वि॒दथे॑षु जग्मयः ।
अ॒ग्नि॒जि॒ह्वा मन॑वः सू॒रच॑क्षसो॒ विश्वे॑ नो दे॒वा , अव॒सा ग॑मन्नि॒ह ॥ ७॥

pṛṣha-daśh’vā maruta[fp]’ pṛśh’ni-mātaraśh’
śhubhañ’yāvāāno vidathēēṣhu jag’ma-yaḥa ।
ag’nijih’ vā mana-vas’ sūra-chak’ṣhasō
viśh’vēē nō dēvā , avasā ga-man’niha ॥ 7 ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥८॥
bhad'raṅ' kar'ṇēbhiś' śhṛṇuyāma dēvā
bhad'ram' paś'yēmāk'ṣhabhir'yajat'rā-ha ।
sthirairaṅ'gaiīs'tuṣh'ṭuvāṁ'sas'tanūbhir'vya-śhēma
dēvahi-taṅ' yadāyu-ḥu ॥ 8 ॥

शतमिन्नु शरदो , अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥
śhatamin'nu śharadō , an'ti- dēvā yat'rāā
naśh'chak'rā jarasan'n' tanūnāām ।
put'rāsō yat'ra- pitarō bhavan'n'ti mā nōō
madh'yā rīīriṣhatāyur'gan'tōōḥo ॥ 9 ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा , अदितिः पञ्च जना , अदितिर्जातमदितिर्जनित्वम् ॥१०॥
adi-tir'dyauradi-tiran'tarik'ṣhamadi-tir'mātā
sa pitā sa put'raḥa ।
viśh'vēē dēvā , adi-ti[fp]' pañ'cha janā ,
adi-tir'jātamadi-tir'janit'vam ॥ 10 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.sanveda.net

[RV S 1-90 (Kāñchī Pāṭhaḥa)]

ऋ॒जु॒नी॒ती नो॒ व॑रु॒णो मि॒त्रो न॑यतु वि॒द्वान् । अ॒र्य॒मा दे॒वैः स॒जोषाः॑ ॥ १ ॥

ṛjunītī nō varu-ṇō mit'rō na-yatu vid'vā-ne ।

ar'yamā dēvais' sajōṣhāāḥa ॥ 1 ॥

ते हि व॑स्वो॒ वस॑वानास्ते , अप्र॑मूरा महो॒भिः । व्र॒ता र॑क्षन्ते वि॒श्वहा॑ ॥ २ ॥

tē hi vas'vō vasa-vānās'tē , ap'ra-mūrā mahōōbhiḥi ।

vratā rak'ṣhan'tē viśh'vāhāā ॥ 2 ॥

ते , अ॒स्मभ्यं॒ शर्म॑ यंसन्नमृता॒ मर्त्ये॑भ्यः । बाध॑माना , अप॒ द्विषः॑ ॥ ३ ॥

tē , as'mabh'yaṁ' śhar'ma-

yaṁ'san'namṛtā mar'tyēēbh'yaḥa ।

bādha-mānā , apad' dviṣha-ḥa ॥ 3 ॥

वि नः॑ प॒थः सु॒वि॒ताय॑ चि॒यन्त्विन्द्रो॑ म॒रुतः॑ । पू॒षा भगो॒ वन्द्या॑सः ॥ ४ ॥

vi na[fp]' pathas' su-vitāya-

chiyan'tvin'drōō maruta-ḥa ।

pūṣhā bhagō van'dyāāsaḥa ॥ 4 ॥

उ॒त नो॒ धियो॒ गो , अ॑ग्राः॒ पूष॒न्विष्ण॒वेव॑यावः । कर्ता॑ नः स्वस्ति॒मत॑ः ॥ ५ ॥

uta nō dhiyō gō , ag'rāḥ[fp]'

pūṣhan'viṣh'ṇavēva-yāvaḥa ।

kar'tāā nas' svas'timata-ḥa ॥ 5 ॥

www.sanveda.net

मधु॒ वाता॑ , ऋताय॒ते मधु॑ क्षरन्ति॒ सिन्ध॑वः । माध्वी॑र्नः स॒न्त्वोष॑धीः ॥६॥

madhu vātāā , ṛtāyatē madhuk'

kṣharan'ti sin'dha-vaḥa ।

mādh'vīīr'nas' san'tvōṣha-dhī-ḥi ॥ 6 ॥

मधु॒ नक्त॑मु॒तोषसो॒ मधु॑म॒त्पार्थि॑वं॒ रजः॑ । मधु॒ द्यौर॑स्तु नः पि॒ता ॥७॥

madhu nak'ta-mutōṣhasō

madhu-mat'pār'thi-vaṁ' raja-ḥa ।

madhud' dyauras'tu na[fp]' pitā ॥ 7 ॥

मधु॑मान्नो॒ वन॒स्पति॒र्मधु॑माँ , अस्तु॒ सूर्यः॑ । माध्वी॒र्गावो॑ भवन्तु नः ॥८॥

madhu-mān'nō vanas'patir'madhu-māṁ ,

as'tu sūr'ya-ḥa ।

mādh'vīr'gāvōō bhavan'tu naḥa ॥ 8 ॥

शं नो॑ मि॒त्रः शं वरु॑ण॒ः शं नो॑ भवत्वर्य॒मा ।

शं न॒ , इन्द्रो॒ बृह॒स्पति॒ः शं नो॒ विष्णु॑रुरुक्र॒मः ॥९॥

śhan' nōō mit'raśh' śhaṁ' varu-ṇaśh'

śhan' nōō bhavat'var'yamā ।

śhan' na , in'drō bṛhas'patiśh' śhan' nō

viṣh'ṇu-ruruk'ramaḥa ॥ 9 ॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.saiveda.net

[RV S 1-89 *& SYVM 25-14 ; SYVK27-18* (Śhṛṅghērī Pāṭhaḥa)]

ॐ आ नोँ भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो , अपरीतास , उद्भिदः ।
देवा नो यथा सदमिद्वृधे , असन्नप्रायुवो रक्षितारोँ दिवेदिवे ॥ १ ॥
ॐ ā nōō bhad'rā[hk]' kratavō yan'tu viśh'vatō
(a)dab'dhāsō , aparītāsa , ud'bhida-ḥa ।
dēvā nō yathā sadamid'vṛdhē , asan'nap'rāāyuvō
rak'ṣhitārōō divēdivē ॥ 1 ॥

देवानाँ भद्रा सुमतिरृजूयतां देवानाँ रातिरभि नो नि वर्तताम् ।
देवानाँ सख्यमुप सेदिमा वयं देवा न , आयुः प्र तिरन्तु जीवसेँ ॥ २ ॥
dēvānāām' bhad'rā sumatir'ṛjūyatān'
dēvānāāṁ' rātirabhi nō ni var'tatām ।
dēvānāāṁ' sakh'yamupa sēdimā vayan'
dēvā na , āyu[fp]' pra tiran'tu jīvasēē ॥ 2 ॥

तान्पूर्वया निविदाँ हूमहे वयं भगँ मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ ३ ॥
tān'pūr'vayā nividāā hūmahē vayam' bhagam'm'
mit'ramadi'tin' dak'ṣhamas'ridham'm ।
ar'yamaṇaṁ' varuṇaṁ' sōmamaśh'vinā
saras'vatī nas' subhagā mayas'karate ॥ 3 ॥

www.sanveda.net

तन्नो॒ वातो॑ मयो॒भु वा॑तु भेष॒जं तन्मा॒ता पृ॑थि॒वी तत्पि॒ता द्यौः ।
तद्ग्रावा॑णः सोम॒सुतो॑ मयो॒भुव॒स्तद॑श्विना शृणुतं धिष्ण्या युवम् ॥ ४॥

tan’nō vātōō mayōbhu vāātu bhēṣhajan’
tan’mātā pr̥thivī tat’pitād’ dyau-ḥu ।
tad’grāvāāṇas’ sōmasutōō mayōbhuvas’tadaśh’vinā
śhr̥ṇutan’ dhiṣh’ṇyā yuvam ॥ 4 ॥

तमीशा॑नं॒ जग॑तस्त॒स्थुष॒स्पतिं॑ धियंजि॒न्वमव॑से हूमहे व॒यम् ।
पूषा नो॒ यथा॒ वेद॑सामस॒द्वृधे॑ र॑क्षिता पा॒युर॑द॒ब्धः स्व॒स्तये॑ ॥ ५॥

tamīśhāāñan’ jagatas’tas’thuṣhas’patin’n’
dhiyañ’jin’vamavasē hūmahē vayam ।
pūṣhā nō yathā vēdasāmasad’vr̥dhē rak’ṣhitā
pāyuradab’dhas’ svas’tayēē ॥ 5 ॥

स्व॒स्ति न॒ , इन्द्रो॑ वृ॒द्धश्र॑वाः स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः ।
स्व॒स्ति न॒स्तार्क्ष्यो॑ , अरि॑ष्टनेमिः स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥ ६॥

svas’ti na , in’drōō vr̥d’dhaśh’ravās’
svas’ti na[fp]’ pūṣhā viśh’vavēēdā-ḥa ।
svas’ti nas’tārk’ṣhyō , ariṣh’ṭanēmis’
svas’ti nō bṛhas’patir’dadhātu ॥ 6 ॥

पृष॑दश्वा म॒रुत॑ः पृश्नि॒मातरः॑ शुभं॒यावा॑नो वि॒दथे॑षु जग्मयः ।
अ॒ग्नि॒जि॒ह्वा मन॑वः सू॒रच॑क्षसो॒ विश्वे॑ नो दे॒वा , अव॒सा ग॑मन्नि॒ह ॥ ७॥

pr̥ṣhadaśh’vā maruta[fp]’ pr̥śh’nimātaraśh’
śhubhañ’yāvāāno vidathēēṣhu jag’mayaḥa ।
ag’nijih’vā manavas’ sūrachak’ṣhasō
viśh’vēē nō dēvā , avasā gaman’niha ॥ 7 ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥८॥

bhad'raṅ' kar'ṇēbhiś' śhṛṇuyāma dēvā
bhad'ram' paś'yēmāk'ṣhabhir'yajat'rā-ha ।
sthirairaṅ'gaiīs'tuṣh'ṭuvāṁ'sas'tanūbhir'vyaśhēma
dēvahitaṁ' yadāyu-ṣhu ॥ 8 ॥

शतमिन्नु शरदो , अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥

śhatamin'nu śharadō , an'ti dēvā yat'rāā
naśh'chak'rā jarasan'n' tanūnāām ।
put'rāsō yat'ra pitarō bhavan'n'ti mā nōō
madh'yā rīīriṣhatāyur'gan'tōōḥo ॥ 9 ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा , अदितिः पञ्च जना , अदितिर्जातमदितिर्जनित्वम् ॥१०॥

aditir'dyauraditiran'tarik'ṣhamaditir'mātā sa
pitā sa put'raḥa ।
viśh'vēē dēvā , aditi[fp]' pañ'cha janā ,
aditir'jātamaditir'janit'vam ॥ 10 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.sanveda.net

[RV S 1-90 (Śhṛṅghērī Pāṭhaḥa)]

ऋ॒जु॒नी॒ती नो॒ व॑रु॒णो मि॒त्रो न॑यतु वि॒द्वान् । अ॒र्य॒मा दे॒वैः स॒जोषाः॑ ॥१॥

ṛjunītī nō varuṇō mit'rō nayatu vid'vā-ne ।

ar'yamā dēvais' sajōṣhāḥa ॥ 1 ॥

ते हि व॑स्वो॒ वस॑वानास्ते , अप्र॑मूरा महो॒भिः । व्र॒ता र॑क्षन्ते वि॒श्वहा॑ ॥२॥

tē hi vas'vō vasavānās'tē , ap'ramūrā mahōbhiḥi ।

vratā rak'ṣhan'tē viś'vāhā ॥ 2 ॥

ते , अ॒स्मभ्यं॒ शर्म॑ यंसन्नमृता॒ मर्त्ये॑भ्यः । बाध॑माना , अप॒ द्विषः॑ ॥३॥

tē , as'mabh'yaṁ' śhar'ma yaṁ'san'namṛtā

mar'tyēbh'yaḥa ।

bādhamānā , apad' dviṣha-ḥa ॥ 3 ॥

वि नः॑ प॒थः सु॑वि॒ताय॑ चि॒यन्त्विन्द्रो॑ मरुतः । पू॒षा भगो॒ वन्द्या॑सः ॥४॥

vi na[fp]' pathas' suvitāya chiyan'tvin'drōō maruta-ḥa ।

pūṣhā bhagō van'dyāsaḥa ॥ 4 ॥

उ॒त नो॒ धियो॒ गो , अ॑ग्राः पूष॒न्विष्ण॒वेव॑यावः ।

कर्ता॑ नः स्वस्ति॒मतः॑ ॥५॥

uta nō dhiyō gō , ag'rā[fp]'

pūṣhan'viṣh'ṇavēvayāvaḥa ।

kar'tā nas' svas'timata-ḥa ॥ 5 ॥

मधु॒ वाता॑ , ऋ॒ताय॒ते मधु॑ क्षरन्ति सिन्ध॑वः । माध्वी॑र्नः स॒न्त्वोष॑धीः ॥६॥

madhu vātā , ṛtāyatē madhuk'

kṣharan'ti sin'dhavaḥa ।

mādh'vīīr'nas' san'tvōṣhadhī-ḥi ॥ 6 ॥

मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥७॥
madhu nak'tamutōṣhasō
madhumat'pār'thivaṁ' raja-ḥa ।
madhud' dyauras'tu na[fp]' pitā ॥ 7 ॥

मधुमान्नो वनस्पतिर्मधुमाँ , अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥८॥
madhumān'nō vanas'patir'madhumāṁ ,
as'tu sūr'ya-ḥa ।
mādh'vīr'gāvōō bhavan'tu naḥa ॥ 8 ॥

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।
शं न , इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥९॥
śhan' nōō mit'raśh' śhaṁ' varu'ṇaśh'
śhan' nōō bhavat'var'yamā ।
śhan' na , in'drō bṛhas'patiśh' śhan' nō
viṣh'ṇururuk'ramaḥa ॥ 9 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.sanveda.net